जटाला, स्त्री, (जटास्त्यस्या इति । जटा+“सिध्मादिभ्यश्च । ५ । २ । ९७ । इति लच् । ततोऽजादित्वात् टाप् । ) जटामांसी । इति राजनिर्घण्टः ॥ (विवरणमस्या जटामांसीशब्दे ज्ञातव्यम् ॥)

जटावती, स्त्री, (जटा विद्यतेऽस्याः । जटा+मतुप् । मस्य वः स्त्रियां ङीप् च । ) जटामांसी । इति राजनिर्घण्टः ॥

जटावल्ली, स्त्री, ( जटेव वल्ली । ) रुद्रजटा । गन्धमांसी । इति राजनिर्घण्टः ॥

जटिः, स्त्री, ( जटति परस्परं संलग्ना भवतीति । जट+“सर्व्वधातुभ्य इन् ।” उणां । ४ । ११७ । इति इन् । ) प्लक्षवृक्षः । इति शब्दरत्नावली ॥ जटा । समूहः । इत्युणादिकोषः ॥

जटिलः, पुं, (जटा अस्यस्येति । जटा+“लोमादिपामादिपिच्छादिभ्यः शनेलचः ।” ५ । २ । १०० । इति इलच् । ) सिंहः । इति शब्दचन्द्रिका ॥ ( ब्रह्मचारी । यथा, मनुः । ३ । १५१ ।
“ जटिलञ्चानधीयानं दुर्ब्बलं कितवन्तथा ॥”
“जटिलो ब्रह्मचारी ।” इति तट्टीकायां कुल्लूकभट्टः ॥) जटायुक्ते, त्रि । इति मेदिनी । ले, ९२ ॥ (यथा, कुमारे । ५ । ३० ।
“ विवेश कश्चिज्जटिलस्तपोवनं
शरीरबद्धः प्रथमाश्रमो यथा ॥” )

जटिला, स्त्री, ( जटिल+अजादित्वात् टाप् । ) जटामांसी । इत्यमरः । २ । ४ । १३४ ॥ (“जटामांसी भूतजटा जटिला च तपस्विनी ।” इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) पिप्पली । इति मेदिनी ॥ वचा । उच्चटा । इति रत्नमाला । दमनकवृक्षः । इति राजनिर्घण्टः ॥ राधिकाश्वश्रूः । यथा, गौरगणोद्देशे ।
“जटिला राधिकाश्वश्रूः कार्य्यतोऽविशदेव तम् ॥”
(ऋषिपत्नीविशेषः । यथा, महाभारते । १ । १९७ । १४ ।
“श्रूयते हि पुराणेऽपि जटिला नाम गौतमी ।
ऋषीनध्यासितवती सप्त धर्म्मभृताम्वरा ॥” )

जटी, स्त्री, (जटि+“कृदिकारादक्तिनः ।” ४ । १ । ४५ । इत्यस्य वार्त्तिकोक्त्या वा ङीष् । ) पर्कटीवृक्षः । इति शब्दरत्नावली ॥ जटामांसी । इति रत्नमाला ॥

जटी [न्], पुं, (जटा अस्यास्तीति । जटा+इनिः । ) प्लक्षवृक्षः । इत्यमरः । २ । ४ । ३२ ॥ (यथा,—
“प्लक्षो जटी पर्कटी च पर्कटी च स्त्रियामपि ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ स्कन्दस्यानुचरविशेषः । यथा, महाभारते । ९ । ४५ । ५८ ।
“ज्वालाजिह्वः करालश्च शितकेशो जटी हरिः ॥”) जटाविशिष्टे, त्रि । (यथा, महाभारते । ७ । ५० । ४२
“ततो हरो जटी स्थाणुर्निशाचरपतिः शिवः ॥”)

जटुलः, पुं, ( जटति देहे संहतो भवतीति । जट संहतौ+बाहुलकादुलच् । ) जतुकम् । जडुल इति भाषा ॥ तत्पर्य्यायः । कालकः २ पिप्लुः ३ । इत्यमरः । २ । ६ । ४९ ॥

जठरं, त्रि, ( जटति एकत्रीभवतीति । जट+बाहुलकादरः ठान्तादेशश्च । यद्वा, जायते इति । जन+“जनेररष्ठ च ।” उणां ५ । ३८ । इति अरः ठान्तादेशः । ) बद्धम् । कठिनम् । इति शब्दरत्नावली ॥ ( यथा, शान्तिशतके । ४ । १३ ।
“इदानीमस्माकं जठरकमठपृष्ठकठिना
मनोवृत्तिस्तत् किं व्यसनविमुखेव शमयति ॥”)

जठरः, पुं क्ली, (जायते गर्भो मलं वा अस्मिन्निति । जन+“जनेररष्ठ च ।” उणां । ५ । ३८ । इति अरः ठान्तादेशः । ) उदरम् । इति मेदिनी ॥ ( यथा, हितोपदेशे । २ । ४४ ।
“ पृष्ठतः सेवयेदर्कं जठरेण हुताशनम् ।
स्वामिनं सर्व्वभावेन परलोकममायया ॥”
देशविशेषे, पुं । स तु कूर्म्मविभागे आग्नेय्यां दिशि वर्त्तते । यथा, वृहत्संहितायाम् । १४ । ८ ।
“आग्नेय्यां दिशि कोशलकलिङ्गवङ्गो
पवङ्गजठराङ्गाः ॥”
तथाच महाभारते । ६ । ९ । ४२ ।
“अत ऊर्द्ध्वं जनपदान् निबोध गदतो मम ।”
इत्युपक्रम्य,—
“ जठराः कुक्कुराश्चैव सदशार्णाश्च भारत ! ॥”
इत्युक्तवान् ॥
पर्व्वतविशेषः । यथा, भागवते । ५ । १६ । २७ ।
“जठरदेवकूटौ मेरुं पूर्व्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रपृथुतुङ्गौ भवतः ॥”
उदररोगविशेषः ।
“रात्रौ जन्म नवीनाशो जठरे जठरेण तु ।”
इति निदानस्थाने द्वादशेऽध्याये वाभटेनोक्तम् । एतत्सम्प्राप्तिर्यथा, सुश्रुते निदानस्थाने ७ अध्याये ।
“कोष्ठादुपर्य्यवसदम्बुसारो
निःसृत्य दुष्टोऽनिलवेगनुन्नः ।
त्वचः समुन्नम्य शनैः समन्ता-
द्विवर्द्धमानो जठरं करोति ॥”)

जठरनुत्, पुं, ( नुदतीति । नुद+क्विप् । ततः षष्ठीतत्पुरुषः । एतत्सेवनेनोदरभङ्गादेवास्य तथात्वम् । ) आरग्वधवृक्षः । इति शब्दचन्द्रिका ॥

जठरामयः, पुं, ( जठरस्य आमयो रोगः । ) जलोदररोगः । इति राजनिर्घण्टः ॥ (अतीसाररोगश्च । तस्य चिकित्सा यथा,—
“कपित्थमध्यं लीढ्वा तु सव्योषक्षौद्रशर्करम् ।
कट्फलं मधुयुक्तं वा मुच्यते जठरामयात् ॥”
इति चरके चिकित्सास्थाने दशमेऽध्याये ॥)

जडं, क्ली, ( जलति लोकान् जीवयतीति । जल+अच् । डलयोरैक्यात् लस्य डत्वम् । ) जलम् । इत्यमरटीकायां रायमुकुटः ॥ ( जलति घनीभवतीति । ) सीसकम् । इति राजनिर्घण्टः ॥ ( अचेतनपदार्थानां स्वरूपम् । यदुक्तं पञ्चदश्याम् । ६ । १२७ ।
“अचिदात्मघटादीनां यत् स्वरूपं जडं हि तत् ॥”)

जडः, त्रि, ( जलति बुद्धिशक्तिमाच्छादयतीति । जल आच्छादने+अच् । ) हिमग्रस्तः । ( शीतलः । यथा, रघौ । ३ । ६८ ।
“मराञ्चमन् हर्षजडेन पाणिना
तदीयमङ्गं कुलिशव्रणाङ्कितम् ॥”
“हर्षजडेन हर्षशिशिरेण ।” इति तट्टीकायां मल्लिनाथः ॥) मूकः । (यथा, मनौ । २ । ११० ।
“नापृष्टः कस्यचिद्ब्रूयात् न चान्यायेन पृच्छतः ।
जानन्नपि हि मेधावी जडवल्लोक आचरेत् ॥”
वधिरः । यथा, तत्रैव । ९ । २०१ ।
“उन्मत्तजडमूकाश्च ये च केचिन्निरिन्द्रियाः ॥”
तथा तत्रैव । ८ । १६४ ।
“अन्धो जडः पीठसर्पी सप्तत्या स्थविरश्च यः ॥”
“अन्धो वधिरः पङ्गुः सम्पूर्णसप्ततिवर्षः ।” इति तट्टीकायां कुल्लूकभट्टः ॥ ) अप्राज्ञः । इति मेदिनी । डे, १४ ॥ ( यथा, विक्रमोर्व्वश्याम् १ अङ्के ।
“अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु
कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्म्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो
मुनिः ॥”
निस्पन्दः । यथा, रघौ । २ । ४२ ।
“जडीकृतस्त्र्यम्बकवीक्षणेन
वज्रं मुमुक्षन्निव वज्रपाणिः ॥”
मोहितः । यथा, तत्रैव । ८ । ७५ । [भ्रमवित:
अथ तं सवनाय दीक्षितः प्रणिधानाद्गुरुरा-
आत्मजशोकविक्लवम्
अभिगम्य जडं विजन्धिवान्
इति शिष्येण किलान्वबोधयत् ॥” )

जडक्रियः, त्रि, ( जडस्य मोहितस्येव क्रिया कार्य्यं यस्य । ) दीर्घसूत्री ॥ चिरक्रियः । इति हलायुधः ॥

जडता, स्त्री, (जडस्य भावः । जड+भावे तल् ।) जाड्यम् । तत्पर्य्यायः । स्तैमित्यम् २ शीतलत्वम् ३ अपाटवम् ४ । इति राजनिर्घण्टः ( यथा, रघुः । ९ । ४६ ।
“अगयदागमरञ्जुपरिग्रहे
भुजलतां जडतामबलाजनः ॥”
इयं हि व्यभिचारिभावविशेषः । अस्या लक्षणं यथा, साहित्यदर्पणे । ३ । १४४ ।
“अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः ।
अनिमिषनयननिरीक्षणतूष्णीम्भावादयस्तत्र ॥”)
विरहदुःखेन जीवन्मात्रस्थितिः । इति रसमञ्जरी ॥

जडा, स्त्री, ( जडयति तत्करोतीति विचलात् अच् ततष्टाप् । ) शूकशिम्बी । इत्यमरः ॥ भूम्यामलकी । इति रत्नमाला ॥

जड़िमा, [ न् ] पुं, (जडस्य भावः । “वर्णदृढादिभ्यः ष्यञ् च ।” ५ । १ । १२३ । इति इमनिच् । ) जडता । तस्य लक्षणं यथा,—
“इष्टानिष्टापरिज्ञानं यत्र प्रश्नेष्वनुत्तरम् ।